# bodhyagItA

# બોધ્યગીતા

## Document Information

Text title : bodhyagItA

File name : bodhyagiitaa.itx

Category : gItA, giitaa

Location : doc_giitaa

Transliterated by : Sunder Hattangadi PSA Easwaran at gmail.com

Proofread by : Sunder Hattangadi, PSA Easwaran

Latest update : June 2, 1998, December 26, 2013

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

# બોધ્યગીતા

ભીમ ઉવાચ ।
અત્રાપ્યુદાહરન્તીમમિતિહાસં પુરાતનમ્ ।
ગીતં વિદેહરાજેન જનકેન પ્રશામ્યતા ॥ ૧॥

અનન્તં બત મે વિત્તં યસ્ય મે નાસ્તિ કિં ચન ।
મિથિલાયાં પ્રદીપ્તાયાં ન મે દહ્યતિ કિં ચન ॥ ૨॥

અત્રૈવોદાહરન્તીમં બોધ્યસ્ય પદસઞ્ચયમ્ ।
નિર્વેદં પ્રતિ વિન્યસ્તં પ્રતિબોધ યુધિષ્ઠિર ॥ ૩॥

બોધ્યં દાન્તમૃષિં રાજા નહુષઃ પર્યપૃચ્છત ।
નિર્વેદાચ્છાન્તિમાપન્નં શાન્તં પ્રજ્ઞાન તર્પિતમ્ ॥ ૪॥

ઉપદેશં મહાપ્રાજ્ઞ શમસ્યોપદિશસ્વ મે ।
કાં બુદ્ધિં સમનુધ્યાય શાન્તશ્ચરસિ નિર્વૃતઃ ॥ ૫॥

બોધ્ય ઉવાચ ।
ઉપદેશેન વર્તામિ નાનુશાસ્મીહ કઞ્ચન ।
લક્ષણં તસ્ય વક્ષ્યેઽહં તત્સ્વયં પરિમૃશ્યતામ્ ॥ ૬॥

પિઙ્ગલા કુરરઃ સર્પઃ સારઙ્ગાન્વેષણં વને ।
ઇષુકારઃ કુમારી ચ ષડેતે ગુરવો મમ ॥ ૭॥

ભીમ ઉવાચ ।
આશા બલવતી રાજન્નૈરાશ્યં પરમં સુખમ્ ।
આશાં નિરાશાં કૃત્વા તુ સુખં સ્વપિતિ પિઙ્ગલા ॥ ૮॥

સામિષં કુરરં દૃષ્ટ્વા વધ્યમાનં નિરામિષૈઃ ।
આમિષસ્ય પરિત્યાગાત્ કુરરઃ સુખમેધતે ॥ ૯॥

ગૃહારમ્ભો હિ દુઃખાય ન સુખાય કદાચન ।

સર્પઃ પરકૃતં વેશ્મ પ્રવિશ્ય સુખમેધતે ॥ ૧૦॥

સુખં જીવન્તિ મુનયો ભૈક્ષ્યવૃત્તિં સમાશ્રિતાઃ ।
અદ્રોહેનૈવ ભૂતાનાં સારઙ્ગા ઇવ પક્ષિણઃ ॥ ૧૧॥

ઇષુકારો નરઃ કશ્ચિદિષાવાસક્તમાનસઃ ।
સમીપેનાપિ ગચ્છન્તં રાજાનં નાવબુધ્દ્વાન્ ॥ ૧૨॥

બહૂનાં કલહો નિત્યં દ્વયોઃ સંકથનં ભવેત્ ।
એકાકી વિચરિષ્યામિ કુમારીશંખકો યથા ॥ ૧૩ ॥

ઇતિ બોદ્ધ્યગીતા સમાપ્તા ॥

From Mahabharata

Encoded and proofread by
Sunder Hattangadi
PSA Easwaran

*bodhyagItA*

pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*